শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৰেঙ্কটনাথার্যঃ কৰিতার্কিককেসরী।

ৰেদান্তাচার্যৰর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৰিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৪২

*This document[*] has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

[*]This was typeset using Bengali for TEX.

श्रीः
श्रीমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্রীমতে রামানুজায নমঃ

# ॥ শ্রীমন্নারাযণীযম্ ॥

## দশক - ৪২

*শকটাসুরৱধৱর্ণনম্*

কদাপি জন্মর্ক্ষদিনে তৱ প্রভো
    নিমন্ত্রিতজ্ঞাতিৱধূমহীসুরা।
মহানসস্ত্ৱাং সৱিধে নিধায সা
    মহানসাদৌ ৱৱৃতে ৱ্রজেশ্ৱরী॥ ১ ॥

ততো ভৱত্ত্রাণনিযুক্তবালক-
    প্রভীতিসঙ্ক্রন্দনসঙ্কুলারৱৈঃ।
ৱিমিশ্রমশ্রাৱি ভৱতসমীপতঃ
    পরিস্ফুটদ্দারুচটচ্চটারৱঃ॥ ২ ॥

ততস্তদাকর্ণনসম্ভ্রমশ্রম-
    প্রকম্পিৱক্ষোজভরা ৱ্রজাঙ্গনাঃ।
ভৱন্তমন্তর্দদৃশুসসমন্ততো
    ৱিনিষ্পতদ্দারুণদারুমধ্যগম্॥ ৩ ॥

শিশোরহো কিং কিমভূদিতি দ্রুতং
    প্রধাৱ্য নন্দঃ পশুপাশ্চ ভূসুরাঃ।
ভৱন্তমালোক্য যশোদযা ধৃতং
    সমাশ্ৱসন্নশ্রুজলার্দ্রলোচনাঃ॥ ৪ ॥

কস্কো নু কৌতস্কুত এষ ৱিস্মযো
    ৱিশঙ্কটং যচ্ছকটং ৱিপাটিতম্।
ন কারণং কিঞ্চিদিহেতি তে স্থিতাঃ
    স্ৱনাসিকাদত্তকরাস্ত্ৱদীক্ষকাঃ॥ ৫ ॥

www.prapatti.com

কুমাৰকস্যাস্য পয়োধৰাৰ্থিনঃ
    প্ৰৰোদনে লোলপদাম্বুজাহতম্।
ময়া ময়া দৃষ্টমনো ৱিপৰ্য্যগা-
    দিতীশ তে পালকবালকা জগুঃ॥ ৬ ॥

ভিয়া তদা কিঞ্চিদজানতামিদং
    কুমাৰকাণামতিদুৰ্ঘটং ৱচঃ।
ভৱৎপ্ৰভাৱাৱিদুৰৈৰিতীৰিতং
    মনাগিৱাশঙ্ক্যত দৃষ্টপূতনৈঃ॥ ৭ ॥

প্ৰৱালতাম্ৰং কিমিদং পদং ক্ষতং
    সৰোজৰম্যৌ নু কৰৌ ৱিৰোজিতৌ।
ইতি প্ৰসৰ্পৎকৰুণাতৰঙ্গিতা-
    স্তৱদঙ্গমাপস্পৃশুৰঙ্গনাজনাঃ॥ ৮ ॥

অয়ে সুতং দেহি জগৎপতেঃ কৃপা-
    তৰঙ্গপাতাৎপৰিপাতমদ্য মে।
ইতি স্ম সঙ্গৃহ্য পিতা ত্বদঙ্গকং
    মুহুৰ্মুহুঃ শ্লিষ্যতি জাতকণ্টকঃ॥ ৯ ॥

অনোনিলীনঃ কিল হন্তুমাগতঃ
    সুৰাৰিৰেৱং ভৱতা ৱিহিংসিতঃ।
ৰজোপি নো দৃষ্টমমুষ্য তৎকথং
    স শুদ্ধসত্ত্বে ত্বয়ি লীনৱান্ ধ্ৰুৱম্॥ ১০ ॥

প্ৰপূজিতৈস্তত্ৰ ততো দ্বিজাতিভি-
    ৰ্ৱিশেষতো লম্ভিতমঙ্গলাশিষঃ।
ৱ্ৰজং নিজৈৰ্বাল্যৰসৈৰ্ৱিমোহয়ন
    মৰুৎপুৰাধীশ ৰুজাং জহীহি মে॥ ১১ ॥

**********